अङ्क-२५
जनवरी-जून २०१५

**वेदविद्या**
ISSN-2230-8962

# औपनिषदिकः कर्मानुशयः

**डॉ. धर्मेन्द्रकुमारसिंहदेवः**

करणं कर्म इति व्युत्पत्त्या कर्मशब्दः क्रियापरकार्थेन सह अनेकधा व्यवह्रियते। विपाकदृशा कर्म बहुधा विवेचितं शास्त्रान्तरेषु। कर्मैव पुनर्जन्मनो कारणम् इत्यपि विचारः प्रसरति उपनिषत्सु। तथाहि - आचरणं वा कर्म वा पुनर्जन्मनो हेतुः। तथा च श्रूयते -

**यथाकारी यथाचारी तथा भवति। साधुकारी साधुर्भवति। पापकारी पापो भवति। पुण्यः पुण्येन कर्मणा। पापः पापेन।**[१]

अयमाशयः। जीवो यथेच्छति तथा कर्म करोति। यथा कर्म करोति तथैव फलं लभते। शङ्करभगवत्पादैः स्पष्टमुक्तम् -

**संसारित्वे च काम एव हेतुरिति ।**[२]

तच्च कर्म सामान्यतया त्रिविधम् - क्रियमाणं, सञ्चितं प्रारब्धञ्चेति।

**क्रियमाणं कर्म**

क्रियमाणं कर्म नामैतस्मिन् जन्मनि क्रियमाणव्यापारं कालान्तरफलभोगसाधनञ्चेति। क्रियमाणं कर्म हि सञ्चितकर्मरूपेण परिणमति।

**सञ्चितं कर्म**

**अनारब्धकर्मविपाकः कर्माशयः सञ्चितम् ।**[३]

अर्थाद् यस्य कर्मणो विपाको नैवारब्धस्तन्नाम सञ्चितम्।

**प्रारब्धं कर्म**

**आरब्धविपाकश्च कर्माशयः प्रारब्धम् ।**[४]

येषां कर्मणां विपाक आरब्धः फलभोगाय शरीरादेश्च प्राप्तिस्तन्नाम प्रारब्धम्। अर्थाद् यैः कर्मभिः शरीरं भोगाश्च जनितानि तानि कर्माणि प्रारब्धकर्माणीत्यभिधीयन्ते। परं पुनर्जन्मने कर्मणामयं क्रमः -

क्रियमाणम् - सञ्चितम् - प्रारब्धम् = पुनर्जन्म

---

१ बृउ. ४.४.५
२ तत्रैव, शाङ्करभाष्यम्
३ वाचस्पत्यम्
४ तत्रैव

अत्रेदं ज्ञेयम्। फलविपाकारम्भीणि कर्माणि व्यापारारम्भात् प्रभृति क्रियासमाप्तिपर्यन्तं क्रियमाणानि निगद्यन्ते। तत्र च तान्येव सर्वाणीह जन्मनि क्रियमाणानि कर्माणि सञ्चितानि भवन्ति एतज्जन्मार्जितानि पूर्वजन्मार्जितानि वानेकजन्मार्जितानि च, सञ्चितेभ्यो विविच्य यानि कर्माणि एकीभूय शरीरमारभन्ते भोगपर्यन्तञ्च तच्छरीरं धारयन्ति, तानि प्रारब्धकर्माणि। तेषामवश्यम्भावी भोग इति सिद्धान्तः।

उपनिषत्प्रमाणं स्वीकुर्वाणा वेदान्तिनस्तावन्मुक्तपुरुषानतिरिच्य सर्वे जायन्ते म्रियन्ते, म्रियन्ते जायन्ते चेति सिद्धान्तयन्ति। यथोपनिषत्सु प्रोच्यते-

**न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् ।**
**अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे ॥**[५]

अपि च सन्ति वैदिकवचनानि, यत्र जीवमुखेनैव समाम्नातं दृश्यते -

**मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः ।**
**नानायोनिसहस्राणि मयोषितानि यानि वै ॥**[६]

श्रौतसाहित्ये छान्दोग्ये बृहदारण्यके च पुनर्जन्मविषयका बहवो मन्त्रा दृश्यन्ते। पञ्चाग्निविद्याया अवसाने समाम्नायते-

**ते पुनः पुरुषाग्नौ हूयन्ते ततो योषाग्नौ जायन्ते लोकान् प्रत्युत्थायिनस्त एवमेवानुपरिवर्तन्ते ।**[७]

अनुपरिवर्तनञ्चैतत् पुनर्जन्म सङ्केतयति। छान्दोग्ये तु स्पष्टमुच्यते -

**तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन्नश्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा।**[८]

अपि च-देवयानं विहाय पितृयाणेनैव मनुष्याः पुनर्जन्म लभन्त इति वेदान्तवचनम्। यदि केनापि यानेन येषां गतिर्नास्ति तेषां कृते स्पष्टमुच्यते -

**अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते तस्माज्जुगुप्सेत।**[९]

महाभारतेऽपि महर्षिणा भृगुणा भरद्वाजाय यदुक्तं तदपीह विज्ञेयम् -

**न जीवनाशोऽस्ति हि देहभेदे मिथ्यैतदाहुर्मृत इत्यबुद्धाः ।**
**जीवस्तु देहान्तरितः प्रयाति दशाधेतैवास्य शरीरभेदः ॥**[१०]

---

[५] कठ. २.६
[६] निरुक्तम्, १३.२.६
[७] बृउ. ६.२.१६
[८] छांउ. ५.१०.७
[९] तत्रैव, ५.१०.८

अत्रेदं तात्पर्यम्। देहस्य नाशे सत्यपि न जीवस्य नाशः। ते खलु मूढा ये जीवस्य मृत्युं वदन्ति। जीवाः खलु निष्प्राणं शरीरं परित्यज्य शरीरान्तरं प्रतिपद्यन्ते। तत्त्वपञ्चकस्य पृथग्भाव एव शरीरनाशः। जीवस्तु महाभूतेभ्यः पृथगभिमत इति।

अनेन च स्पष्टं कर्मैव पुनर्जन्मनो मूलकारणम्। अयमेव उपनिषदां मौलः सिद्धान्तः। परं कर्मिणां मनुष्याणां पुनर्जन्मनो विपाकव्यवस्थामुररीकृत्य कर्मवैविध्यं प्रसरति। तथापि सामान्येन कर्मभेदा एवं भवन्ति। तद्यथा - प्रवृत्तं, निवृत्तं, विहितं, निषिद्धं, प्रायश्चित्तं, सहजं, नित्यं, नैमित्तिकं, काम्यं चेति। पुनश्च विपाकदृशा शुक्लं, कृष्णं मिश्रञ्चेति विभज्यन्ते। एत एव कर्मभेदास्तत्तत् सम्प्रदायेषु नामान्तरेणापि व्यवह्रियन्ते।

**कर्म**

पुनर्भवस्य हेतुतत्त्वविचारे कर्मणां कारणतामुपनिषदोऽपि स्वीकुर्वन्ति। कर्माणि च क्रियमाणानि सञ्चयं लभन्ते। सञ्चितानि च तानि यावन्ति भोगाय शरीरधारणोपयोगीनि भवन्ति, तानि प्रारब्धमिति निगद्यन्ते। प्रारब्धानाञ्च कर्मणां भोगेनैव क्षयः। तथा च-

**तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत् किञ्चेह करोत्ययम् तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे ॥**[११]

इत्थञ्च प्रारब्धान्येव कर्माणि वर्तमानजन्मनः कारणानि भवन्ति । ननु भगवद्गीतायामुक्तम्-

**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ।**[१२]

एतेन प्रतीयते ज्ञानेन प्रारब्धानामपि कर्मणां क्षयो जायत इति चेन्न, प्रारब्धेतरसञ्चितकर्मणामेव भस्मीभावस्याभिप्रेतत्वात्। तथा च शङ्करभगवत्पादैरुक्तम्-

**सामर्थ्याद् येन कर्मणा शरीरमारब्धं तत् प्रवृत्तफलत्वादुपभोगेनैव क्षीयते - अतो यानि अप्रवृत्तफलानि ज्ञानोत्पत्तेः प्राक् कृतानि ज्ञानसहभावीनि चातीतानेकजन्मकृतानि च तान्येव सर्वाणि भस्मसात् कुरुते।**[१३]

ब्रह्मसूत्रेऽपि प्रोक्तम् -

**अनारब्धकार्ये एव तु पूर्वे तदवधेः।**[१४]

तद्भाष्यं यथा -

---

[१०] महाभारतम्, शान्तिपर्व, १८७.२७

[११] बृउ. ४.४.३

[१२] गीता. ४.३७

[१३] तत्रैव, शांभा.

[१४] ब्रसू. ४.१.१५

**अप्रवृत्तफले एव पूर्वे जन्मान्तरसञ्चिते अस्मिन्नपि च जन्मनि प्राग् ज्ञानोत्पत्तेः सञ्चिते सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते, न त्वारब्धकार्ये सामिभुक्तफले, याभ्यामेतद्ब्रह्मज्ञानायतनं जन्म निर्मितम्।**[१५]

शङ्करभगवत्पादैः पुनरप्युक्तम् -

**प्रारब्धं बलवत्तरं खलु विदां भोगेन तस्य क्षयः**
**सम्यग्ज्ञानहुताशनेन विलयः प्राक्सञ्चितागामिनाम् ।**
**ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ये सर्वदा संस्थिता-**
**स्तेषां तत् त्रितयं न हि क्वचिदपि ब्रह्मैव ते निर्गुणम् ॥**[१६]

अपि च विद्यारण्यस्वामिना **पञ्चदश्यामुक्तम्** -

**प्रारब्धकर्मप्राबल्याद् भोगेष्विच्छा भवेद् यदि ।**
**क्लिश्यन्नेव तदाप्येष भुङ्क्ते विष्टिगृहीतवत् ॥**[१७]
**प्रारब्धकर्मणि क्षीणे व्यवहारो निवर्तते ।**
**कर्माक्षये त्वसौ नैव शाम्येद् ध्यानसहस्रतः ॥**[१८]

प्रारब्धेतरकर्मणामेव तपसा **प्रायश्चित्तैर्ज्ञानेन** वा क्षयो भवति। अन्यथा कर्माण्यनुसृत्य संसारो जायत एव। अत एव श्रूयते -

**अविद्यायामन्तरे वर्तमानाः स्वयंधीराः पण्डितंमन्यमानाः ।**
**दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥**
**न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् ।**
**अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे ॥**[१९]

पुनर्भवविषये जिज्ञासोदेति केन जन्म गृह्यते ? को जीवति ? कश्च म्रियत इति? आत्मा त्वमरोऽजरो निरञ्जनः शुद्धो बुद्धो मुक्त इति उपनिषत्सु निगद्यते। स एव मायाव्यष्टिभूतयाऽविद्यया संसरतीति स्वीक्रियते चेत्, तर्हि केन शरीरेण संसरणं भवति। आतिवाहिकेन शरीरेण संसरतीति तत् समाधानम्।

**आतिवाहिकशरीरम्**

अस्मिन् विषये योगवासिष्ठं प्रमाणीक्रियते -

**आतिवाहिक एकोऽस्ति देहोऽन्यस्त्वाधिभौतिकः ।**

---

[१५] तत्रैव, शांभा.
[१६] विचू. ४५४
[१७] पंद. ७.४३
[१८] तत्रैव, ७.२६३
[१९] कठ. २.३.५.-६

**सर्वेषां भूतजातीनाम् ...................................॥**[20]

इदं शरीरमपि व्यष्टिसमष्टिभेदेन द्वैविध्यं भजति। तथा हि-

**सर्वेषां देहौ द्वौ भूतानां कारणात्मनाम् ।**

**अजस्य कारणाभावादेक एवातिवाहिकः ।।**

**पृथ्व्यादिरहितो देहो यो विराडात्मको महान् ।**

**आतिवाहिक एवासौ चिन्मात्राच्छनभोमयः ॥**[21]

एवञ्च,

**चित्तमात्रशरीरेऽसौ न पृथ्व्यादिक्रमात्मकः ।**

**आद्यः प्रजापतिर्व्योमवपुः प्रतनुते प्रजाः ॥**[22]

समष्टिरूपेणेदं शरीरं ब्रह्माण्डमाच्छादयति। व्यष्टिरूपमातिवाहिकं शरीरन्तु विष्णुधर्मोत्तरे निरूपितम्। तच्च वाचस्पत्यकोशे समुद्धृतम्। तथा हि -

**तत्क्षणादेव गृह्णाति शरीरमतिवाहिकम् ।**

**ऊर्ध्वं व्रजन्ति भूतानि त्रीण्यस्मात् तस्य विग्रहात् ।।**

**आतिवाहिकसञ्ज्ञोऽसौ देहो भवति भार्गव ।**

**केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित् ॥**[23]

इदं शरीरं तु मुक्तात्मनां न भवति। यथा चोक्तम् -

**आतिवाहिक एवास्ति न प्रबुद्धमतेः किल ।**

**आधिभौतिकदेहस्य वाचो वात्र कुतः कथम् ॥**[24]

मरणानन्तरं प्रेतशरीरप्राप्तेश्च पूर्वं शरीरस्यास्य पौराणिकी व्यवस्था भवति। तथा हि -

**कृते सपिण्डीकरणे नरः संवत्सरात् परम् ।**

**प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते ॥**[25]

अत्रेदं तात्पर्यम्। भोगदेहप्राप्तेः पूर्वं यदा प्रेतदेहं परित्यज्यते ततः पूर्वमातिवाहिकशरीरस्य व्यवस्था भवति। भोगदेहस्य प्राप्तिश्च सूक्ष्मशरीरेणैव भवतीति।

---

[20] योवा. ३.३.७

[21] तत्रैव, ३.३.८. .३.१४.४

[22] तत्रैव, ३.३.११

[23] वाचस्पत्यम्

[24] योवा. ३.३.३२

[25] वाचस्पत्यम्

**अनुशयः**

अनुशयो नामावशेषकर्मफलविशेषः। यदा कर्माणि सूक्ष्मरूपेण जीवेन सहानुशेरते तदातिवाहिकशरीरस्य कार्यमपूर्वरूपेणानुशयेनैव निर्वहतीति उपनिषत्सिद्धान्तः। तथा च सूत्रम् -

**कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ।**[२६]

अत्र भाष्ये शङ्कराचार्यपादैर्विस्तरेण विवेचितम् -

**केचित्तावदाहुः - स्वर्गार्थस्य कर्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम, भाण्डानुसारिस्नेहवत् । यथा हि स्नेहभाण्डं रिच्यमानं न सर्वात्मना रिच्यते भाण्डानुसार्येव कश्चित्स्नेहशेषोऽवतिष्ठते तथाऽनुशयोऽपीति।**[२७]

एवञ्च कृतानां कर्मणां जीवेन सह शेषरूपेण संलग्नतयावस्थानमेवानुशय इति वदन्ति। एतन्मतमवलम्ब्य भगवत्पादैरग्रे निगदितम् -

न स्वर्गफलस्येष्टादेः कर्मणो भाण्डानुसारिस्नेहवदेकदेशोऽनुवर्तमानोऽनुशय इति। यदि हि येन सुकृतेन कर्मणेष्टादिना स्वर्गमन्वभूवंस्तस्यैव कश्चिदेकदेशोऽनुशयः कल्प्येत, ततो रमणीय एवैकोऽनुशयः स्यान्न विपरीतः। तत्रेयमनुशयविभागश्रुतिरुपरुध्येत-

**'तद्य इह रमणीयचरणा अथ य इह कपूयचरणाः ( छा.5.10.7 ) इति।**[२८]

अतोऽग्रे मतान्तराणि दत्त्वा सिद्धान्तसूत्रं विद्यते । यथा -

**सुकृतदुष्कृते एवेति तु बादरिः।**[२९]

तद्भाष्यञ्च यथा -

**बादरिस्त्वाचार्यः सुकृतदुष्कृते एव चरणशब्देन प्रत्याय्येते इति मन्यते। चरणमनुष्ठानं कर्मेत्यनर्थान्तरम्। तथा हि - अविशेषेण कर्ममात्रे चरतिः प्रयुज्यमानो दृश्यते। यो हीष्टादिलक्षणं पुण्यं कर्म करोति तं लौकिका आचक्षते- धर्मं चरत्येष महात्मेति। आचारोऽपि च धर्मविशेष एव। भेदव्यपदेशस्तु कर्मचरणयोर्ब्राह्मणपरिव्राजकन्यायेनाप्युपपद्यते। तस्माद् रमणीयचरणाः प्रशस्तकर्माणः, कपूयचरणा निन्दितकर्माण इति निर्णयः।**[३०]

अग्रे तृतीयाऽधिकरणेऽनिष्टकर्मणामपि अनुशयस्य विचारः कृतः। एवञ्च सुकृतदुष्कृतकर्मणां भोगानन्तरं शेषभाग एवानुशयः। कर्माण्येव कानिचिद् वासनारूपेण जीवमनुशेरत इत्येव सङ्क्षेपेण

---

[२६] ब्रसू. ३.१.८

[२७] तत्रैव, शाङ्करभाष्यम्.

[२८] तत्रैव

[२९] ब्रसू. ३.१.११

[३०] तत्रैव, शाङ्करभाष्यम्.

निगदितुं शक्यते। वस्तुतस्तु वासनैवानुशयरूपेण जीवमनुशेरत इति निर्विवादं प्रतीयते। वेदान्ते चेयं वासना चित्तधर्म एव, यात्मावासनां तिरोभावयति। तदाहुः शङ्करभगवत्पादाः -

**अनात्मवासनाजालैस्तिरोभूतात्मवासना ।**
**नित्यात्मनिष्ठया तेषां नाशे भाति स्वयं स्फुटा ॥**[३१]

अनात्मवासना चेयं द्विधा भवति। अनादिवासना, अर्जितवासना चेति। अर्जितया कर्मवासनया कोऽपि जीवः कस्याञ्चिद् योनौ जन्म गृह्णाति। अनादिवासनया च तस्यां योनौ भोगसामग्रीं घटयतीति। यथा कश्चिज्जीवः स्वार्जितकर्मवासनाभिः प्रारब्धभोगाभिर्मार्जारयोनिं प्राप्नोति। तत्र योनौ या मूषकादिभक्षणरूपा भोगसामग्री जायते, सा भवत्यनादिवासनाजन्या। एवमन्यास्वपि योनिषु यथायथमनात्मवासनाद्वैविध्यं विवेचनीयम्।

डॉ. धर्मेन्द्र कुमार सिंहदेवः
सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्,
मानितविश्वविद्यालयः भोपालपरिसरः
बागसेवनिया, भोपालम्, (मध्यप्रदेशः)

[३१] विचू. २७६